M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. ______

Ser. 1173

Title: Sitastaka Stotra

1173

Title	S'ītalāṣṭaka Stotra
Author	(Skandapurāṇa)
Editor	
Year, Vols.	
Publisher	
Remarks	1173 Scribe Rāmacandra

श्रीगणेशायनमः॥ अस्य श्रीशीतलाष्टकस्तोत्रमंत्रस्य महादेवऋषिः अनुष्टुप् छंदः श्रीशीतला देवता भवानी शक्तिः विस्फोटकनिवृत्तये जपेविनियोगः॥ श्रीमहादेव उवाच॥

वंदेहं शीतलां देवीं रासभस्थां दिगंबरां॥ मार्जनीकलशोपेतां शूर्पालंकृतमस्तकां॥१॥

वंदेहं शीतलां देवीं सर्वरोगभयापहां॥ यामासाद्य निवर्तेत विस्फोटकभयं महत्॥२॥

शीतले शीतले चेति यो ब्रूयाद् दाहपीडितः॥ विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति॥३॥

यस्त्वामुदकमध्ये तु ध्यात्वा पूजयेन्नरः॥ विस्फोटकभयं घोरं गृहे तस्य न जायते॥४॥

शीतले ज्वरदग्धस्य पूतिगंधयुतस्य च॥ प्रनष्टचक्षुषः पुंसः त्वामाहुर्जीवनौषधं॥५॥

गलगंडग्रहा रोगाः ये चान्ये दारुणं नृणां॥ त्वदनुध्यानमात्रेण शीतले यांति संक्षयं॥६॥

न मंत्रं नौषधं तस्य पापरोगस्य विद्यते॥ त्वमेका शीतले धात्री नान्यां पश्यामि देवतां॥७॥

मृणालतंतुसदृशीं नाभिहृन्मध्यसंस्थितां॥ यस्त्वां संचिंतयेद्देवी तस्य मृत्युर्न जायते॥८॥

अष्टकं शीतलादेव्या यो नरः प्रपठेत् सदा॥ विस्फोटकभयं घोरं गृहे तस्य न जायते॥९॥

शीतले त्वं जगन्माता शीतले त्वं जगत्पिता॥ शीतले त्वं जगद्धात्री शीतलायै नमो नमः॥१०॥

रासभो गर्दभश्चैव खरो वैशाखनंदनः॥ शीतलावाहनश्चैव दूर्वाकंदनिकृंतनः॥११॥

एतानि खरनामानि शीतलाग्रे तु यः पठेत्॥ तस्य गेहे शिशूनां च शीतलारुङ् न जायते॥१२॥

शीतलाष्टकमेवेदं न देयं यस्यकस्यचित्॥ दातव्यं च सदा तस्मै श्रद्धाभक्तियुताय वै॥१३॥

इति श्रीस्कंदपुराणे शीतलाष्टकस्तोत्रं संपूर्णं॥ रामचंद्रेण लिखितमेतद्॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥